अनुक्रमांकः ...................................
निरीक्षकस्य हस्ताक्षरम् .......................

**Paper Code**
**BV-303**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा – दिसम्बरमासः – 2018**

**बी. ए. व्याकरणम् (सत्रम् : तृतीयम्)**

**संस्कृतम्**

**तृतीयपत्रम्-संस्कृतसाहित्यम् (क)**

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

---

**अवधेयम् :** प्रश्नपत्रमिदं 'क, ख, ग' इति खण्डत्रये विभक्तमस्ति। प्रतिखण्डम् अङ्कनिर्धारणं तत्रैव द्रष्टुं शक्यते। प्रतिखण्डं प्रदत्तानां निर्देशानामनु-सरणपुरस्सरमेव प्रश्नानामुत्तराणि लेखनीयानि 'सर्वे प्रश्ना अनिवार्याः'।

## (खण्ड – "क" पद्यम्) 20 अङ्काः

**प्रश्नः1– छन्दोऽलङ्काररसव्याकरणादिटिप्पणीनिर्देश – पुरस्सरं केषाञ्चन त्रयाणां पद्यानां व्याख्या कार्या –** **(5X3=15)**

(क) भयमागमनान्मृत्योः प्रीतिं धर्मपरिग्रहात्।
जन्मदुःखादपर्यन्ताच्छोकमागन्तुमर्हसि।।

(ख) न तस्योत्पद्यते क्लेशो यस्य कायगता स्मृतिः।
चित्तं सर्वास्ववस्थासु बालं धात्रीव रक्षति।।

(ग) प्रक्लेद्यमद्भिर्वदनं विलोक्याः सर्वतो दिशः।
चायां दृष्टिश्च तारासु जिजागरिषुणा सदा।।

(घ) अदृष्टतत्त्वेन परीक्षकेण स्थितेन चित्रे विषयप्रचारे।
चित्तं निरोद्धुं न सुखेन शक्यं कृष्टादको गौरिव सस्यमध्यात्।।

(ङ) तस्माच्चरन् चरोऽस्मीति स्थितोऽस्मीति च धिष्ठितः।
एवमादिषु कालेषु स्मृतिमाधातुमर्हसि।।

**प्रश्नः2– सौन्दरनन्दस्य प्रतिपाद्यो विषयो लेखनीयः** **(5X1=05)**

***अथवा***

**अश्वघोषस्य काव्यसौन्दर्यं प्रतिपादयत।**

## (खण्ड – "ख") 25 अङ्काः
## (ऐतिहासिकं काव्यम्)

**प्रश्नः3– अधोलिखितेषु गद्यांशेषु रसालङ्कारव्याकरणादि – टिप्पणीनिर्देशपुरस्सरं काचिद् गद्यत्रयी व्याख्येया** **(7X3=21)**

(क) अरुण एष प्रकाशः पूर्वस्यां भगवतो मरीचिमालिनः। एष भगवान् मणिराकाशमण्डलस्य, चक्रवर्ती खेचरचक्रस्य, कुण्डलमाखण्डलदिशः, दीपको ब्रह्माण्डभाण्डस्य, प्रेयान् पुण्डरीकपटलस्य, शोकविमोकः कोकलोकस्य, अवलम्बो रोलम्बकदम्बस्य, सूत्रधारः सर्वव्यवहारस्य, इनश्च दिनस्य। अयमेवाहोरात्रं जनयति, अयमेव वत्सरं द्वादशसु भागेषु विभनक्ति, असावेव चर्कर्ति बर्भर्ति जर्हर्ति च जगत्।

(ख) यावदेष ब्रह्मचारी बटुरलिपुञ्जमुद्धूय कुसुमकोर-कानवचिनोति तावत् तस्यैव सतीर्थ्योऽपरस्तत्-समानवयाः कस्तूरिकारेणुरूषित इव श्यामः, चन्दनचर्चितभालः, कर्पूरागुरुक्षोदक्षुरितवक्षोबाहुदण्डः, सुगन्धपटलैरून्निद्रयन्निव निद्रामन्थराणि कोरक-निकुरम्बकान्तरालसुप्तानि मिलिन्दवृन्दानि झटिति समुपसृत्य निवारयन् गौरबटुमेवमवादीत्।

(ग) मुने! विलक्षणोऽयं भगवान् सकलकलाकलापकलनः सकलकालनः करालः। स एव कदाचित् पयःपूरपरितान्यकूपारतलानि मरूकरोति, सिंहव्याघ्र-भल्लूकगणडकफेरुशशसहस्रव्याप्तान्यरण्यानि जनपदीकरोति, मन्दिरप्रासादहर्म्यशृङ्गाटकचत्वरो-द्यानतडागगोष्ठमयानि नगराणि च काननीकरोति, निरीक्ष्यतां कदाचिदस्मिन्नेव भारते वर्षे यायजूकैः राजसूयादियज्ञा व्ययाजिषत।

(घ) अपश्यच्च – लताप्रतानवितानवेष्टितरम्भास्तम्भ – त्रितयस्य मध्ये नीलवस्त्रखण्डवेष्टितमूर्धानं, हरित-कञ्चुकं, श्यामवसनानद्धकटितरं कर्बुराधोवसनम्, काकचेष्टासनेनोपविष्टं, रम्भालवाललग्नाधोमुख – खड्गत्सरून्यस्तविपर्यस्तहस्तयुगलं, लशुनगन्धिभिः निश्वासैः कदलीकिसलयानि मलिनयन्त विंशति-वर्षकल्पं यवनयुवकम्।

(ङ) अथं मुनिरपि दाडिमकुसुमास्तरणाच्छन्नायामिव गाढरुधिरदिग्धायां शयानं, वियुज्यमानभारतभुवमालिङ्गन्तमिव, सततताम्रचूडभक्षणपातकेनेव ताम्रीकृतम्, छिन्नकन्धरं यवनहतकमवलोक्य, सहर्षं ससाधुवादं सरोमोद्गमं च गौरसिंहमाश्लिष्य सगणः स्वकुटीरं प्रविवेश।

**प्रश्नः4– शिवराजविजयस्य प्रथमनिश्वासे वर्णितः कन्यकापहरणवृत्तान्तः स्वशब्दैर्लेखनीयः। (4X1=04)**

***अथवा***

**भारतवर्षस्य मुगलशासनकालीनायाः दशायाः वर्णनं कुरुत।**

## (खण्ड – “ग”) 25 अङ्काः

## (काव्यशास्त्रम्)

**प्रश्नः5– काव्यदीपिकानुसारम् अधोलिखितयोः कयोश्चिद् द्वयोः प्रश्नयोरुत्तरं सलक्षणभेदोदाहरणपुरस्सरं लिखत – (7.5X2=15)**

(क) अभिनयः
(ख) अङ्कः
(ग) श्रव्यकाव्यम्

**प्रश्नः6– काव्यदीपिकानुसारं कयोश्चिद् द्वयोरुत्तरं लिखत – (05X2=10)**

(क) कथोद्धातः
(ख) अवलगितम्
(ग) विष्कम्भकम्

**--------------x--------------**